National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 24-27
© 2025 NJHSR
www.sanskritarticle.com

**विनयकुमारवरः**
शोधच्छात्रः, साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः, भोपालम्, म.प्र.

**मार्गनिर्देशकः**
**प्रो॰ अजयकुमारमिश्रः**
साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः, भोपालम्, म.प्र.

**Correspondence:**
**विनयकुमारवरः**
शोधच्छात्रः, साहित्यविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
भोपालपरिसरः, भोपालम्, म.प्र.

# भैरवानन्दनाटके रसविचारः एकमध्ययनम्

**विनयकुमारवरः , प्रो॰ अजयकुमारमिश्रः**

**नाट्यकारपरिचयः**

दिवाकरोपाध्यायस्य पुत्रोऽयं मणिकविः भैरवानन्दराघवानन्दयोः नाटकयोः रचयिता। अस्य बहूनि नामान्तराणि विद्यन्ते। तत्र मणिकः, मानिकः, मानुः, मणिवर्धनश्च। अयं नेपालनरेशस्य जयस्थितिमल्लस्य सुनोः धर्ममल्लस्य सभायां राजसभापण्डित आसीत्। अतः अस्य समयः चतुर्दशशताब्दीः। कवेः कृतयः यथा - १. काव्यप्रकाशमणिसारः, २. कुमारसम्भवसुखबोधिनी, ३. मालतीमाधवदीपिका, ४. विक्रमोर्वर्शीयदीपिका, ५. भैरवानन्दनाटकम्, ६. राघवानन्दनाटकम्, ७. नेपालराजप्रशस्तिः, ८. आलवड्नृपप्रशस्तिः (वाखाटेश्वरकाव्यम्) ।

**भैरवानन्दनाटकम्**

भैरवानन्दनाटकं तान्त्रिकपृष्टभूमौ आधारिता रचना वर्त्तते । यस्य नायकः क्रमादित्यः, प्रतिनायकः भैरवानन्दः, नायिका मदनवती च अस्ति। तान्त्रिकपृष्टभूमौ रचिते अस्मिन् नाटके षडङ्काः विद्यन्ते। नाटकमिदं राज्ञः धर्ममल्लस्य विवाहोत्सवे नेपालदेशे अभिनीतमासीत् । नाटके अङ्गिरसः शृङ्गारः, अङ्गरसरूपेण वीर-करुण-बीभत्सरसाः परिलक्ष्यन्ते।

**रससंयोजनम्**

रस्यते आस्वाद्यते इति व्युत्पत्त्या रस-भाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसन्धि-भावशबलतादीनामष्टानां ग्रहणम् । एते सर्वेऽपि आस्वाद्यमानत्वात् रसशब्दवाच्याः। अथ 'कोऽयं रस' इति जिज्ञासायां काव्यपठनेन श्रवणेन अभिनयदर्शनेन वा यादृश आनन्दः भवति स एवानन्दो 'रस' इति सार्वजनीनानुभवः। अतः रस आनन्दरूप इति सिध्यति। स्वयं भरतमुनिना नाट्यशास्त्रे अस्य रसस्य परिभाषा प्रस्तुता। तद्यथा- 'यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिर्भवति। यथा हि गुडादिभिर्द्रव्यैः व्यञ्जनैः ओषधिश्च वाडवादयो रसा निर्वर्तन्ते तथा नानाभावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्तीति।' स्वयं भरतेनापि रसभावयोरपरिहार्योऽविच्छिन्नः सम्बन्ध इति निगदितमस्ति। तद्यथा-'न भावहीनोऽस्ति रसो न भावो रसवर्जितः'। भारतीयकाव्यशास्त्रस्य महत्त्वपूर्णविषयः रसनिष्पत्तिः। एतद्ज्ञानेन रसतत्त्वज्ञानं पूर्णतामायाति । वस्तुतः भरतेन मूलतो न रसस्वरूपम्, अपि तु रसनिष्पत्तिरेव व्याख्याता । तथा हि-

**'विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिः'** इति ।

भारतीयसाहित्ये रसतत्त्वमेकं प्रमुखं स्थानमधिकरोति। आलंकारिकाः अस्य तत्त्वस्य गभीरविवेचनां कुर्वन्ति। ध्वनितत्त्वस्य प्रतिष्ठाता आचार्यः आनन्दवर्द्धनः यद्यपि ध्वनिं काव्यात्मतया मानयति तथापि रसालंकारवस्तुरूपेषु त्रिविधेषु रसस्यैव महत्त्वं स्वीकरोति। आचार्यः कुन्तकः काव्यामृतरसेन एव अन्तश्चमत्कारः जायते इति प्रतिपादयति। आचार्यः महिमभट्टः रसं काव्यात्मानमामनति। वाग्देवतावतारः मम्मटः काव्ये रसस्य मुख्यतामुद्घोषयति। विश्वनाथकविराजः "वाक्यं रसात्मकं काव्यम्" इति काव्यलक्षणं कृत्वा काव्ये रसस्य अनिवार्यतां प्रकाशयति। अत्र रसविशेषाणां संख्या निर्णीयते। स्थायिभावानां संख्यानुरूपा रससंख्या। अतः अत्रापि मतैक्यं नास्ति। तथापि मम्मटविश्वनाथादिभिः 'नव रसाः स्वीकृताः'। तदुक्तं विश्वनाथेन-

**"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**

**बीभत्सोऽद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ।।"[१]**

पुनश्च वत्सलस्य स्थायित्वस्वीकारे वात्सल्यरसोऽपि गृह्यते । अतः दश रसाः अवधेयाः । तत्र शृङ्गारादीनां भावरसाभासादीनामपि लक्षणादिकं काव्यप्रकाशसाहित्यदर्पणादिषु स्पष्टमस्ति ।

**भैरवानन्दनाटके विभिन्नाः रसाः -**

साहित्यशास्त्रानुसारं नाटके मुख्यतः शृङ्गार वीरः वा एकः रसः मुख्यरूपेण स्यात्। भैरवानन्देऽस्मिन् नाटके यत् लक्षणं दृश्यते साहित्यशास्त्रानुसारं नाटकमिदं नव्यत्वं प्रकटयति। नाट्यकार-मणिकविः भैरवानन्दनाटके बहुघटनानामवतारणां कृत्वा अन्तिमे पर्याये नायकनायिकानां मिलन सफलोपायः इति सूच्यते। प्रस्तुते शोधपत्रे भैरवानन्दनाटके रसानां संयोजना कथं जातेति अधोलिखितेषु विचार्यते-

**शृङ्गाररसः -**

शृणाति हिनस्ति कामिनः इति शृङ्गः। तत्र नायकनायिकादयः आलम्बनविभावाः, चन्द्रचन्दनभ्रमरध्वनिप्रभृतयः उद्दीपनविभावाः। भ्रूविक्षेपकटाक्षादयः अनुभावाः। लज्जौत्सुक्यादयः व्यभिचारिभावाश्च भवन्ति । शृङ्गारस्य रतिः स्थायिभावः । शृङ्गारस्य द्वौ मुख्यभेदौ भवतः सम्भोग-विप्रलम्भश्च।[२]

**सम्भोगशृङ्गारः -**

सम्यक् भुज्यते अन्योन्यमुपभुज्यते इति सम्भोग । इर्ष्यादियभावेन यत्र नायिकानायकौ परस्परं पूर्णभावेन उपभोगं कुरुतः सः सम्भोगशृङ्गारः ।

**विप्रलम्भशृङ्गारः -**

आचार्यविश्वनाथस्य मतानुसारेण यत्र नायको गाढः अनुरागः भवति परन्तु परस्परं मिलनं न भवति तत्र विप्रलम्भः शृङ्गारः भवति।[३] विप्रलम्भशृङ्गारस्य पञ्च भेदाः भवन्ति। अभिलाष-विरह-ईर्ष्या- प्रवास-मादयः। विप्रलम्भशृङ्गारस्य दश कामावस्थाः भवन्ति- अभिलाषः, चिन्तनं, स्मृतिः, गुणकथा, उद्वेगः, प्रलापः, उन्मादः, संज्वरः, जडता, मरणं चेति । नाटकेऽत्र अयं रसः विचार्यते । यथा -

तालजङ्घः कथयति-

**या नारदेन मुनिना मम भूप्रदेशे**
**संस्थापिता स्वरूपिणी मदनावतीति।**
**सम्बोधिता प्रतिदिनं च मया सुगाढम्**
**साऽद्यापि मां न भजतीति मनो विषादः।।[४]**

तालजङ्घः परिवारजनं वीरसेनं सुरसेनं च तन्मनसि विद्यमानां चिन्तां प्रकाशयति। सः कथयति नारदमुनिः पातालपुरे सुन्दरीं मदनावतीं स्थापितवान् । सा मदीया भविष्यतीति उक्तवान्। अहमपि प्रतिदिनं तस्याः रूपगुणगानं करोमि । परन्तु सा सुन्दरी मां न भजति इति हेतोः मम मनसि महान् विषादः। अत्र मदनावतीं प्रति तालजङ्घस्य अनुरागेव आलम्बनं, प्रतिदिनं तस्याः रूपगुण-गानदिकम् उद्दीपनं, पुनः मदनावत्याः तालजङ्घे नानुरागत्वात् तस्य विषादः भवति व्यभिचारिभावः। अत्र विप्रलम्भशृङ्गारः पूर्वरागश्च।

पुनश्च तेन-

**मानिनी मानमातङ्गक्षोभिचूतांकुरांकुशः।**
**वसन्तोऽयं वसम्मेऽद्य नीयते मदनावती।।[५]**

तालजङ्घः सगर्वं सुरसेनं प्रति वक्ति- अयं वसन्तकालः प्रवर्त्तते। तस्मिन् चुताङ्कुराः आम्रवृक्षे उद्भवन्ति। तदग्रभागदर्शनं विरहिणां मनसि कामभावं जागरयति। ममापि तादृशं मनः भवति। मदनावतीसमीपं वसन्तकालः मां नयतीति अनुभवामि। अत्रापि मदनावतीविषयकानुरागः आलम्बनं, वसन्तकालः, चुताङ्कुरादिकं तु उद्दीपनं, तालजङ्घस्य मदनावतीसमीपं गन्तुं कथनम् उद्वेगं दर्शयति। अतः अभिलाषविप्रलम्भः शृङ्गाररसः अत्र स्पष्टः ।

अन्यत्र श्लोके -

**हा कापालिक सिंहकेयवदने चान्द्रीकलेवासि माम्**
**त्यक्त्वा त्वं पतिता क्षणेन सुभगे किम्वा करिष्याम्यहम्।**
**मूढोऽस्मि त्वदधीनजीवविभवो नष्टा च चेष्टा गता**
**प्राणाः सम्प्रति शून्यमेति हृदयं भ्रष्टंगता चेतना।।[६]**

कुमारः प्राणप्रियायाः मदनावत्याः वियोगजनितसन्तापं न सहते । विरही असौ ताम् उद्दिश्य कथयति – हा प्रिये ! त्वं चन्द्रमसः ज्योत्स्ना इव कमनीया दृश्यसे। हे सुभगे! त्वां विना अयं संसारः मत् कृते सारहीनः। अपि च तव अदर्शनेन मूढः अहं जीवनाभावम् अनुभवामि। प्राणाः निर्गच्छन्ति इव प्रतीयन्ते। अहं चेतनायुक्तः अपि चेतनहीनवत् अनुभवामि। अत्र कुमारस्य मदनावतीगतविच्छेदः आलम्बनं, मदनावत्याः सौन्दर्यस्मरणमेव उद्दीपनं, जीवनाभावादिकथनं जडता, तथा च उन्मादादिकं विप्रलम्भं स्पष्टीकरोति। अतः विरहविप्र-लम्भशृङ्गारः रसः।

अन्यत्र श्लोके -

**तत्र कटाक्षशरघातविदीर्णदेह-**
**स्तुल्य हुताश परिवाधमना नितान्तम्।**
**तिष्ठामि ताम्प्रमिताश्च दिदृक्षमानो (णो)**
**न्यग्रोधपादपतले मदनातुरोऽहम्॥[७]**

नाटकस्य अन्यतमं मुख्यं चरित्रं चारुदत्तनामकः वणिक्पुत्रः। तत्र चारुदत्तकर्णावत्योः पारस्परिकानुरागस्य चित्रं दृश्यते। सः कामावस्थां नाटयन् वदति - " अहं कामातुरः, वटवृक्षतले उपविशामि। तस्याः नायिकायाः (कर्णावत्याः) कटाक्षशराघातेन अहं विदीर्णदेहः भवामि"। अग्निसमः कामाग्निः शरीरे ज्वलति। तथापि तस्याः दर्शनेच्छया प्राणान् धृत्वा अत्र वटवृक्षमूले उपविशामि। अत्रापि कर्णावतीगतः अनुराग एव आलम्बनं, तस्याः दर्शनेच्छा भवति उद्दीपनं, प्रिया विरहेण कामाग्नि अग्निसमः इति सन्तापः। अतः विरहजनितः विप्रलम्भः शृङ्गाररसः भवति।

**भयानकरसः -**

भयानकरसे भयरूपस्थायिभावो भवति। अस्य वर्णः कृष्णः, देवता कालः। अस्य आश्रयाः स्त्रियः अथवा नीचप्रकृतिजनाः भवन्ति। भयङ्करशब्दश्रवणेन भयङ्करप्राणिदर्शनेन भयमुत्पन्नम्। एषः भयानकरसस्य आलम्बनविभावः भवति। तस्य विकृतिस्वचेष्टादयः उद्दीपनविभावाः भवन्ति। विवर्णता-गद्गदभाषण-प्रलय-स्वेद-रोमाञ्च-

कम्प- इतस्ततः अवलोकनानि अस्यानुभावाः भवन्ति। जुगुप्सा-आवेग-संमोह- संन्नाह-ग्लानि-दीनता-शङ्का-अपस्मार-संभ्रम-मरणादीनि अस्य व्यभिचारिभावाः सन्ति। एभिः निष्पन्नः भयानकस्थायिभावः भयानकरसरूपं लभते।[८] अस्मिन् भैरवानन्दनाटकस्य प्रथमाङ्के भयानकरसः दृश्यते । यथा –

**फेत्काराराावरौद्रातरुकुहरगतोलूकधूत्कारनादैः**
**नृत्यते सादृहासा ध्वनिभिरयः जयड्डाकिनी हूँकृतैश्च ।**
**दृप्यत्कापालिकानां डमरु डिमडिमारावगम्भीर घोषैः**
**रौद्रं चेततश्मशानं सकलभयकरं सिद्धिदं साधकानाम् ।।**[९]

अर्थात् भैरवानन्दः भ्रूणं नीत्वा सपरिवारं श्मशानं गच्छति । तत्र श्मशानं दृष्ट्वा सर्वे आश्चर्यान्विताः भवन्ति। तथाहि – श्मशाने प्राचीनाः द्रूमाः भवन्ति। तेषु गर्ताः भवन्ति। गर्तमध्यं पेचकाः स्थित्वा धूतकाकारनादं कुर्वन्ति। उल्लुकानां नादः अट्टहासध्वनिवत् सर्वत्र प्रसरति। हुंहुंकारध्वनिभिः ते कदाचित् अन्यान् आह्वयन्ति। कापालिकाः डमरूणां गम्भीरघोषैः श्मशानं कठीनीकुर्वन्ति। इदं श्मशानं भयजनकस्थलम्, किन्तु साधकानां सिद्धिस्थानम् एतद् भवति। अत्र श्मशानम् आलम्बनविभावः, पेचकानाम् अट्टहासध्वनिवत् रावः, कापालिकानां डमरूणां गम्भीरघोषादयः भवन्ति उद्दीपनविभावाः, सर्वेषां भयोत्पादनं भवति अनुभावः। अतः भयानकरसः।

**बीभत्सरसः -**

यत्र जुगुप्सा स्थायिभावः भवति, तत्र बीभत्सरसः आस्वाद्यते। अयं नीलवर्णः, देवता महाकालः। नष्टमांसवमनादयः पदार्थाः अस्य रसस्य आलम्बनविभावाः भवन्ति। तेषु कीटपतनदुर्गन्धादयः अस्य उद्दीपनविभावाः। वैराग्यात् जघनस्तनादिषु घृणाभावः, मुख-संवरणम्, नेत्रसंकोचनम्, नासावद्धविकूणनं चित्कारादयश्च अस्य अनुभावाः भवन्ति। मोह, अपस्मारः, आवेगः, व्याधिः, मरणम्, ग्लान्यादयश्च व्यभिचारिणः सन्ति। आवेगार्त्तिशंकादयश्च व्यभिचारिभावाः भवन्ति।[१०] भैरवानन्दनाटके यथा -

**पाताले मदनावतीति विदिता मान्या विधातुः सुता**
**तस्या भ्रुणसुतास्थिचर्मपललाव्या हुत्य होमानले।**
**गोप्तारं च विधाय वाहुजवरं महाकुले यन्मया**
**साध्यावाहनपादुका महितला सिद्धिस्तथा खेचरी।।**[११]

भैरवानन्दः शिष्याभ्यां स्वकीयां कामनां प्रकटयन् कथयति - विधातुः पुत्री मदनावती पातालपुरे तिष्टति। तस्याः भ्रूणसुतस्य अस्थिचर्ममांसादिं होमाग्नौ आहूतिरूपेण दास्यति। तेन सः असाध्यसाधनां खेचरीसिद्धिं साधयितुं वाञ्छति। मदनावत्या सह धर्मादित्यपुत्रस्य क्रमादित्यस्य मेलनं कारयित्वा तयोः भ्रूणं होमाग्नौ नाशयितुं तस्य उद्येश्यम् अस्ति। अत्र भ्रूणसुतस्य अस्थिचर्म-पललादिकम् अत्र आलम्बनं, पुनः चर्मादीनाम् आहूतिः इति कथनेन घृतादीनि अनुभावाः जायन्ते। जुगुप्साऽत्र स्थायि। अथ अत्र बीभत्सरसः भवति ।

अन्यत्र श्लोके -

**निनादोऽयं तावद्विकलकुररीकर्जितमि**
**जगच्चित्ताकर्षी परित इव आयाति किमसौ।**
**मनोभूक्षामेति भ्रमतिहृदयं विह्वलयति**
**तनूस्तब्दोकिम्मेस्खलयति गमनं किं विह्नहो।।**[१२]

श्मशाने भैरवानन्दकुमारादयः भ्रूणेन सह वर्तन्ते। तत्र भैरवानन्दः साधनहोमम् आचरति । यत्र भ्रूणस्य विसर्जनं भविष्यति। भ्रूणात् अस्थिचर्ममांसानां पृथक्करणार्थं कुमारम् आदिश्य तेभ्यः एकं ग्रहीतुं वदति। कुमारः अस्थिभागं गृह्नाति। तदा आश्चर्यकरं दृश्यं वेताल-अश्वादीनाम् आगमनं दृश्यते । अथ ततः अस्थि कुमारात् भैरवानन्दः यदा नेतुं वाञ्छति तदा आकाशात् शब्दः श्रूयते । कुमारः मदनावत्याः शब्दः भवेत् इति चिन्तयति। किञ्च तं शब्दं इत्थं वर्णयति। यथा – "अयं निनादः विकलकुररीवत् अस्ति। मदीयं चेतः आकर्षति। मनः क्षोभयति, हृदयं भ्रामयति विह्वलयति च। गमनं मे स्खलयति।" इत्थम् आकाशात् शब्दं निशम्य कुमारः वर्णयति। अत्र श्मशानं तु आलम्बनं, भ्रूणस्य होमाग्नौ विसर्जनं उद्दीपनभावः, भ्रूणात् अस्थिचर्ममासानां पृथक्करणं घृणादि अनुभावं जनयति । अथ अत्र बीभत्सरसः भवति ।

**अद्भुतरसः -**

अद्भुतरसस्य विस्मयः स्थायिभावः। अलौकिकपदार्थाः देवतादयः आलम्बनविभावाः। तत्र तेषां दर्शनगुणकीर्त्तनाय उद्दीपनविभावाः विद्यन्ते। गन्धर्व देवता, स्तम्भ-स्वेद-रोमाञ्च-वेपथु-नेत्रविन्यासादयः अनुभावाः। वितर्कावेगहर्षधृत्यादयो व्यभिचारिभावाः सन्ति। एतैर्निष्पन्नो विस्मयरूपः स्थायिभावो अद्भुतरसदशां प्रपद्यते।[१३] उदाहरणं यथा –

**भूमौ पतित मग्नस्य श्रीफलास्यास्य गर्भतः।**
**गलन्ति रत्नजातानि प्रभवन्ति समन्ततः ।।**[१४]

अस्मिन् श्लोके श्रीफलम् आलम्बनं, तस्य प्रभवः तु उद्दीपनम्। आश्चर्यमयकथावस्तुवर्णनात् अद्भूतरसः।

**करुणरसः -**

अस्य रसस्य स्थायिभावः शोकः। करुणरसस्य आविर्भावः ईष्टवस्तुनः नाशात् अथवा अनिष्टद्रव्यस्य प्राप्तिकारणात् भवति। अस्य वर्णः कपोतवर्णः, देवता यमः, स्थायिभावः शोकः। आलम्बनः, विनष्ट-व्यक्तिः, उद्दीपनं दाहादिकावस्था। दैवनिन्दन-भूमिपतन-क्रन्दन-वैवर्ण्य-उच्छवास-निःश्वास-स्तम्भ-प्रलपनादयः अस्य अनुभावाः, निर्वेद-मोहापस्मार-व्यधि-ग्लानि-स्मृति-श्रम-विषाद-जडता- उन्माद-चिन्तादयः अस्य व्यभिचारिभावाश्च सन्ति।[१५] उदाहरणार्थ यथा नाटके –

**नष्टं सम्प्रति पौरुषं कथमहो त्रैलोक्ययेतुर्मम**
**आः मर्त्याधम वाणभिन्नवपुषा लज्जावती मे मतिः।**
**लज्जाकातरभूढशून्यहृदय किम्वा करिष्याम्यहम्**
**हा!हा! नाशमुपैति दानवकुलं सर्वं हताशो मम।।**[१६]

अत्र कविः तालजङ्घस्य हताशभावं वर्णयति। क्रमादित्य-तालजङ्घयोः परस्परं युद्धं प्रचलति। कुमारस्य बाणक्षेपेण तालजङ्घः मूर्च्छां याति। पुनः आश्वस्य विधातारं सम्बोध्य वदति - हा विधे!

मां रक्षतु । मम पौरुषं नष्टं याति । अहो त्रिभुवनविजयिनः मम इयम् अवस्था ? मम प्रतिद्वन्दी एकः मर्त्यमानवः । तस्मात् मम पराजयः भविष्यति इति विचिन्त्य अहं लज्जाम् अनुभवामि। लज्जया कातरः अहं शून्यहृदयः भवामि। हा! हा! यदि मम नाशः भवति तर्हि दानवकुलस्य अपि विनाशः भविष्यति। अतः हे विधातः! परित्रायताम्। अत्र पौरूषं नष्टमिति, लज्जाकातरमूढशून्यहृदयस्तु आलम्बनं, हा! हा! आः इति शब्दः उद्दीपनं भवति। अत्र विषादः, ग्लानिः, चिन्ता, वितर्कः चादीनां व्याभिचारिभावानां वर्णनात् भावशबलता । स्थायिभावः शोकः । अतः करुणरसः भवति।

**वीररसः -**

अस्य उत्साहः स्थायिभावः भवति। तत्र तेनोत्साहेन वीररसः ध्वन्यते। उत्तमप्रकृतिः जनः अस्य रसस्य आश्रयः भवति । अस्य वर्णः सुवर्णः, देवता महेन्द्रः, आलम्बनं विजेतव्यः शत्रुः, उद्दीपनं शत्रोः चेष्टाः भवन्ति, अनुभावाः युद्धादिसामग्री अथवा अन्यान्यसाधना-नामन्वेषणम्। धृति-मति- गर्व-स्मृति-तर्क-रोमाञ्चाः अस्य व्यभिचारि-भावाः।[१७] अस्य रसस्य चत्वारः भेदाः सन्ति । यथा- १) दानवीरः, २) धर्मवीरः, ३) युद्धवीरः, ४) दयावीरः । अत्र युद्धवीरः -

**एषोऽहं भुवनत्रयैकमहिमा दैत्याधिपग्रामणी**
**भूर्मी स्वर्गपुरे महेन्द्रसदनप्रस्थे सदाध्यासितः।**
**सोऽभूद्भासुरखड्गचालनलसद्दोर्दण्डसंसाधितः**
**गीर्वाणाधिपदर्पहारणपटुः श्रीतालजङ्घो बली ।।**[१८]

अर्थात्, तालजङ्घः परिवारसदस्यं वीरसेनं सुरसेनं च कथतयति - अहं भूवनत्रयस्य महिमा भवामि। एकाकी पराक्रमी अस्मि। दैत्यनृपेषु अहम् अग्रणीः। स्वर्गे मर्त्ये अमरावत्यां च अहं सदा संशितः भवामि। अस्त्रचालने मादृशः कोऽपि नास्ति। इन्द्रस्य गर्वभञ्जने अहं समर्थः। एतादृशः बलवान् अहं तालजङ्घः अस्मि। अत्र बली तालजङ्घः आलम्बनं, स्वर्गे मर्त्ये अमरवत्यां च अहं सदा संशित इति पदम् उद्दीपनं तालजङ्घः स्वस्थः यशः स्वमुखेन गायति। अतः अत्र गर्वं व्यभिचारिभावः। अथ अत्र वीररसः भवति।

**निष्कर्षः-**

इत्थं भैरवानन्दनाटके नानारसैः समलङ्कनमिदं नाटकमस्ति। शृङ्गारसु अङ्गी, अन्ये अङ्गस्थानीयाः। शोधपत्रेऽत्र दिङ्मात्र-मुदाहरणं प्रस्तुतं समीक्षितञ्च ।

**सहायकग्रन्थसूची -**


- विश्वनाथकविराजः, *साहित्यदर्पणः*, शास्त्री, आचार्यः कृष्णमोहन, व्याख्याकारः, वाराणसी, चौखम्भा संस्कृत संस्थान, २०१८ ।
- मणिकविः, *भैरवानन्दनाटकम्*, अप्रकाशितम् ।


**पाद टिप्पणी :-**

[१] सा.द. ३/१८३

[२] शृङ्गं मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गारः इष्यते ।। सा. द. ३/१८३

[३] यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ। सा.द. ३य परि.

[४] भैरवा. १/३५

[५] भैरवा. १/३८

[६] भैरवा. २/१

[७] भैरवा. ३/१

[८] सा. द. ३/२३५-२३८

[९] भैरवा. १/६९

[१०] सा. द. ३/२३९-२४१

[११] भैरवा. १/ १८

[१२] भैरवा. १/७५

[१३] सा. द. ३/ २४२-२४४

[१४] भैरवा. १/२६

[१५] सा. द. ३/२२२-२२५

[१६] भैरवा. १/५५

[१७] सा. द. ३/२३२-२३४

[१८] भैरवा. १/३४